# shrI budha aShTottarashatanAma stotraM

# શ્રીબુધાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : budhAShTottarashatanAmastotra

File name : budha108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth mandaksk at gmail.com

Proofread by : KSR Ramachandran ramachandran_ksr at yahoo.ca

Latest update : November 19, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીબુધાષ્ટોત્તરશતનામસ્તોત્રમ્

બુધ બીજ મન્ત્ર - ૐ બ્રાઁ બ્રીં બ્રૌં સઃ બુધાય નમઃ ॥

બુધો બુધાર્ચિતઃ સૌમ્યઃ સૌમ્યચિત્તઃ શુભપ્રદઃ ।
દૃઢવ્રતો દૃઢબલ શ્રુતિજાલપ્રબોધકઃ ॥ ૧॥

સત્યવાસઃ સત્યવચા શ્રેયસામ્પતિરવ્યયઃ ।
સોમજઃ સુખદઃ શ્રીમાન્ સોમવંશપ્રદીપકઃ ॥ ૨॥

વેદવિદ્વેદતત્ત્વજ્ઞો વેદાન્તજ્ઞાનભાસ્કરઃ ।
વિદ્યાવિચક્ષણ વિદુર્ વિદ્વત્પ્રીતિકરો ઋજઃ ॥ ૩॥

વિશ્વાનુકૂલસઞ્ચારી વિશેષવિનયાન્વિતઃ ।
વિવિધાગમસારજ્ઞો વીર્યવાન્ વિગતજ્વરઃ ॥ ૪॥

ત્રિવર્ગફલદોઽનન્તઃ ત્રિદશાધિપપૂજિતઃ ।
બુદ્ધિમાન્ બહુશાસ્ત્રજ્ઞો બલી બન્ધવિમોચકઃ ॥ ૫॥

વક્રાતિવક્રગમનો વાસવો વસુધાધિપઃ ।
પ્રસાદવદનો વન્દ્યો વરેણ્યો વાગ્વિલક્ષણઃ ॥ ૬॥

સત્યવાન્ સત્યસંકલ્પઃ સત્યબન્ધિઃ સદાદરઃ ।
સર્વરોગપ્રશમનઃ સર્વમૃત્યુનિવારકઃ ॥ ૭॥

વાણિજ્યનિપુણો વશ્યો વાતાંગી વાતરોગહૃત્ ।
સ્થૂલઃ સ્થૈર્યગુણાધ્યક્ષઃ સ્થૂલસૂક્ષ્માદિકારણઃ ॥ ૮॥

અપ્રકાશઃ પ્રકાશાત્મા ઘનો ગગનભૂષણઃ ।
વિધિસ્તુત્યો વિશાલાક્ષો વિદ્વજ્જનમનોહરઃ ॥ ૯॥

ચારુશીલઃ સ્વપ્રકાશો ચપલશ્ચ જિતેન્દ્રિયઃ ।
ઉદઙ્ગ્મુખો મખાસક્તો મગધાધિપતિર્હરઃ ॥ ૧૦॥

સૌમ્યવત્સરસઞ્જાતઃ સોમપ્રિયકરઃ સુખી ।

સિંહાધિરૂઢઃ સર્વજ્ઞઃ શિખિવર્ણઃ શિવંકરઃ ॥ ૧૧॥

પીતામ્બરો પીતવપુઃ પીતચ્છત્રધ્વજાંકિતઃ ।
ખડ્ગચર્મધરઃ કાર્યકર્તા કલુષહારકઃ ॥ ૧૨॥

આત્રેયગોત્રજોઽત્યન્તવિનયો વિશ્વપાવનઃ ।
ચામ્પેયપુષ્પસંકાશઃ ચારણઃ ચારુભૂષણઃ ॥ ૧૩॥

વીતરાગો વીતભયો વિશુદ્ધકનકપ્રભઃ ।
બન્ધુપ્રિયો બન્ધયુક્તો વનમણ્ડલસંશ્રિતઃ ॥ ૧૪॥

અર્કેશાનપ્રદેષસ્થઃ તર્કશાસ્ત્રવિશારદઃ ।
પ્રશાન્તઃ પ્રીતિસંયુક્તઃ પ્રિયકૃત્ પ્રિયભાષણઃ ॥ ૧૫॥

મેધાવી માધવાસક્તો મિથુનાધિપતિઃ સુધીઃ ।
કન્યારાશિપ્રિયઃ કામપ્રદો ઘનફલાશ્રયઃ ॥ ૧૬॥

બુધસ્યૈવમ્પ્રકારેણ નામ્નામષ્ટોત્તરં શતમ્ ।
સમ્પૂજ્ય વિધિવત્કર્તા સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૭॥

॥ ઇતિ બુધ અષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

Provided by Manda Krishna shrikanth mandaksk at gmail.com
Proofread by KSR Ramachandran ramachandran_ksr at yahoo.ca

*shrI budha aShTottarashatanAma stotraM*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*